शे इति किम् ? मोक्ता। मोक्तुम्। [1]मोक्तव्यम्। मुचादीनाम् इति किम् ? [2]तुदति। नुदति।

[८२६] शे तृम्फादीनामुपसङ्ख्यानं कर्तव्यम्। (म. भा. ३.२६१)

के पुनः तृम्फादयः ? [3]'तृफ तृम्फ तृप्तौ' (धा. पा. १३०८,१३०९) 'दृफ दृम्फ उत्क्लेशे' (धा. पा. १३१४, १३१५), 'गुफ गुम्फ ग्रन्थे' (धा. पा. १३१८,१३१९), 'उभ उम्भ [4]पूरणे (धा. पा. १३२०/१३२१), 'शुभ शुम्भ [5]शोभार्थे' (धा.पा. १३२२, १३२३) इत्यत्र ये सानुषङ्गाः तृम्फादयः [6]तेषाम् 'अनिदितां हल उपधायाः क्ङिति' (६.४.२४/४१५) इति अनुनासिकलोपे कृते नुम् विधीयते, स च विधानसामर्थ्यात् न लुप्यते। तृम्फति। दृम्फति। गुम्फति। उम्भति। शुम्भति। ये तु निरनुषङ्गाः तेषां [7]तृफति, दृफति, गुफति, उभति, शुभति इत्येवं भवति॥

## मस्जिनशोर्झलि। (६०/२५४२)

मस्जि [8]नशि इत्येतयोरङ्गयोः झलादौ प्रत्यये[9] नुमागमो भवति। मङ्क्ता। मङ्क्तुम्। मङ्क्तव्यम्। नंष्टा। नंष्टुम्। नंष्टव्यम्। झलि इति किम् ? मज्जनम्। नशनम्। 'मस्जेरन्त्यात् पूर्वं नुममिच्छन्ति अनुषङ्गादि[10]लोपार्थम्' (८.२.२१/२५४१ वा.)। मग्नः। मग्नवान्॥

## रधिजभोरचि। (६१/२३०२)

रधि जभि इत्येतयोः[11] अजादौ प्रत्यये[12] नुमागमो भवति। रन्धयति। रन्धकः। साधुरन्धी। रन्धंरन्धम्। रन्धो वर्तते। जम्भयति। जम्भकः। साधुजम्भी। जम्भंजम्भम्। जम्भो वर्तते। परापि सती वृद्धिर्नुमा बाध्यते, नित्यत्वात्। अचि इति किम् ? रद्धा। [13]जभ्यम्॥

## नेट्यलिटि रधेः। (६२/२५१६)

इडादौ अलिटि प्रत्यये परे रधे[14]र्नुमागमो न भवति[15]। रधिता। रधितुम्। रधितव्यम्। इटि इति किम् ? रन्धनम्। रन्धकः। अलिटि इति किम् ? ररन्धिव। ररन्धिम। नुमि कृते संयोगान्तत्वात् 'असंयोगाल्लिट् कित्' (१.२.५/२२४२) इति कित्त्वं नास्ति इति [16]नलोपो न भवति। अथ क्वसौ कथं भवितव्यम् ? रेधिवान् इति। कथम् ? एत्वाभ्यासलोपयोः कृतयोः इडागमः [17]क्रियते, [18]ततो नुमागमः, तस्य औपदेशिककित्त्वाश्रयो लोपः। अथ इटि लिटि [19]इत्येवं नियमः कस्मान् न [20]क्रियते, लिटयेव इटि नान्यत्र इति ? विपरीतमप्यवधारणं सम्भाव्येत, इटयेव लिटि नान्यत्र इति। तथा हि सति ररन्ध इत्यत्र न स्यात्, रधिता इत्यत्र च स्यादेव।

## रभेरशब्लिटोः। (६३/२५८१)

[21]रभेरङ्गस्य शब्लिड्वर्जितेऽजादौ प्रत्यये [22]परतो नुमागमो भवति। आरम्भयति। आरम्भकः। साध्वारम्भी। आरम्भमारम्भम्। आरम्भो वर्तते। अशब्लिटोः इति किम् ? आरभते। आरेभे[23]। अचि इत्येव, आरब्धा॥

---

1. मोक्तव्यम् नास्ति क. ई. 2. तुदती नुदती क. 3. तृप तृम्फ क. 4. प्लवने क. 5. शोभने क. 6. पठचन्ते इत्यधिकम् क. ई. 7. नुम् न इत्यधिकम् क. 8. नश् क. ह. 9. परतो इत्यधिकम् क. ह. 10. लोपार्थे यथा स्यात् क, संयोगादिलोपो यथा स्यात् इ. 11. अङ्गयोः इत्यधिकम् क. 12. परतो इत्यधिकम् क. ब. ड. इ. ई. 13. जभ्यम् नास्ति इ. 14. अङ्गस्य इत्यधिकम् क. 15. पूर्वेण प्राप्तः प्रतिषिध्यते इत्यधिकम् ह. 16. नकारलोपो ई. 17. क्रियते नास्ति ई. 18. तत्र कृते ब. ई. 19. इत्येष ब. 20. उक्तः ब.क. 21. रभेः इत्यस्य क. 22. परे ई. 23. आरेभाते आरेभिरे इत्यधिकम् इ.